## प्रथमः पाठः

# चत्वारि धामानि

**शिक्षिका** — भारति! भवती जानाति किं कः अयं महापुरुषः?



**भारती** — आर्ये! अयं खलु जगद्गुरुः शङ्कराचार्यः।

**महेशः** — आम्! अहमपि जानामि एते किल तस्य चत्वारः शिष्याः।

**देवेशः** — शङ्कराचार्यस्य प्रथमशिष्यस्य नाम सुरेश्वराचार्यः इति।

**शिक्षिका** — देवेश ! अन्येषां त्रयाणां शिष्याणां नामानि कानि?

**देवेशः** — अहं न जानामि।

**शारदा** — द्वितीयः शिष्यः हस्तामलकः तृतीयः शिष्यः त्रोटकाचार्यः चतुर्थःशिष्यः पद्मपादः।

**शिक्षिका** — साधु, अपि जानन्ति शङ्करमठानि?

**सर्वे** — न जानीमः।

**शिक्षिका** — शङ्कराचार्येण चतुर्षु स्थानेषु चतसृषु दिक्षु चत्वारि मठानि स्थापितानि। तानि चत्वारि पवित्रधामानि इति प्रसिद्धानि।

**महेशः** — आर्ये! उत्तरदिशि बदरीनाथः, दक्षिणदिशि रामेश्वरम्, पश्चिमदिशि द्वारका, पूर्वदिशि जगन्नाथपुरी इति किल चत्वारि धामानि।

**शिक्षिका** — सत्यम्। किन्तु धर्मप्रचाराय शङ्कराचार्येण स्थापितानि मठानि अपि चत्वारि धामानि इति प्रसिद्धानि। तानि चतसृषु दिक्षु सन्ति।

**भारती** — तानि धामानि कानि?

**शिक्षिका** — शृङ्गेरिमठम्, गोवर्धनमठम्, शारदामठम्, ज्योतिर्मठम्।

**देवेशः** — कस्यां कस्यां दिशि सन्ति?

**शिक्षिका** – पश्यन्तु इदं कोष्ठकं, स्पष्टं भवति –

| दक्षिणदिशि | पूर्वदिशि | पश्चिमदिशि | उत्तरदिशि |
|---|---|---|---|
| शृङ्गेरिमठम् | गोवर्धनमठम् | शारदामठम् | ज्योतिर्मठम् |
| शृङ्गेरी | जगन्नाथपुरी | द्वारका | बदरीनाथः |
| कर्णाटकराज्ये | उडीसाराज्ये | गुजरातराज्ये | उत्तराखण्डराज्ये |

**शिक्षिका** – धर्म एव भारतस्य एकतायाः मूलाधारः। 'धर्मो रक्षति रक्षितः' अतः धर्मरक्षणेन एव भारतं संरक्षितं भवति। धर्मरक्षणार्थं वेदान्ततत्त्वानां प्रचारार्थम् एतानि मठानि स्थापितानि। मठानां स्थापकं जगद्गुरुम् आदिशङ्करं स्मरामः।

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम्।
नमामि भगवत्पादं शङ्करं लोकशङ्करम्।।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| चत्वारः | = चार (पुं.) | धर्मप्रचाराय | = धर्म प्रचार के लिए |
| धर्मरक्षणेन | = धर्म रक्षा से | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

(क) शारदामठं कस्यां दिशि अस्ति?

(ख) शङ्कराचार्यस्य प्रथमशिष्यस्य नाम किम्?

(ग) ज्योतिर्मठं कुत्र अस्ति?

(घ) द्वारका कस्मिन् राज्ये अस्ति?

(ङ) जगद्गुरुः कः आसीत्?

2. **एकवाक्येन उत्तरं लिखत–**

(क) शङ्कराचार्येण स्थापितानां मठानां नामानि कानि?

(ख) कः कस्य एकतायाः मूलाधारः?

(ग) मठानि किमर्थं स्थापितानि?

(घ) शङ्कराचार्यस्य चत्वारः शिष्याः के?

(ङ) भारतं कथं संरक्षितं भवति?

### 3. उचितं मेलयत –

| | (अ) | (ब) |
|---|---|---|
| (क) | दक्षिणदिशि | शङ्कराचार्यः |
| (ख) | पश्चिमदिशि | गोवर्धनमठम् |
| (ग) | बदरीनाथे | शृङ्गेरिमठम् |
| (घ) | उडीसाराज्ये | ज्योतिर्मठम् |
| (ङ) | जगद्गुरुः | शारदामठम् |

### 4. कोष्ठकपदानि उपयुज्य रिक्तस्थानानि पूरयत–

(गोवर्धनमठम्, भगवत्पादं, धर्मो, मूलाधारः, पद्मपादः)

(क) नमामि ............... शङ्करं लोकशङ्करम्।

(ख) पूर्वदिशि ............... अस्ति।

(ग) ............... रक्षति रक्षितः।

(घ) शङ्कराचार्यस्य चतुर्थःशिष्यः ............... ।

(ङ) धर्म एव भारतस्य एकतायाः............... अस्ति।

### 5. विलोमपदानि लिखत–

(क) धर्मः – ................।

(ख) प्रसिद्धानि – ................।

(ग) स्मरणम् – ................।

(घ) गुरुः – ................।

(ङ) ज्ञानम् – ................।

### 6. प्रथमा–बहुवचन–रूपाणि लिखत–

(क) अहम् – ................

(ख) नाम – ................

(ग) शिष्यः – ................

(घ) धाम – ................

(ङ) मठम् – ................

**योग्यताविस्तारः –**

- | पुंल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
  |---|---|---|
  | एकः | एका | एकम् |
  | द्वौ | द्वे | द्वे |
  | त्रयः | तिस्रः | त्रीणि |
  | चत्वारः | चतस्रः | चत्वारि |
  | पञ्च | पञ्च | पञ्च |

अवधेयम्–त्रिषु लिङ्गेषु सङ्ख्यायां चतुःपर्यन्तं भेदः भवति पञ्चतः भेदो नास्ति।

- | | | | | |
  |---|---|---|---|---|
  | आचार्यः | सुरेश्वराचार्यः | हस्तामलकः | त्रोटकाचार्यः | पद्मपादः |
  | नाम | सरस्वती, भारती पुरी | तीर्थः, आश्रमः | गिरी, पर्वतः सागरः | वनम्, अरण्यम् |
  | आम्नायपीठम् | शृङ्गेरिपीठम् | शारदापीठम् | ज्योतिर्पीठम् | गोवर्धनपीठम् |
  | मठम् | शृङ्गेरिमठम् | शारदामठम् | ज्योतिर्मठम् | गोवर्धनमठम् |
  | स्थानम् | शृङ्गेरी | द्वारका | बदरीनाथः | जगन्नाथपुरी |
  | राज्यम् | कर्णाटकम् | गुजरातम् | उत्तराखण्डः | उडीसा |
  | वेदः | यजुर्वेदः | सामवेदः | अथर्ववेदः | ऋग्वेदः |
  | दिक् | दक्षिणा | पश्चिमा | उत्तरा | पूर्वा |

- द्वारका–बदरीनाथ–जगन्नाथपुरी–रामेश्वर£o"]पञ्चवाक्यानि लिखत।

*ते पुनन्त्युरुकालेन दर्शनादेव साधवः।*

## द्वितीयः पाठः

# कालबोधः

**शिष्यः** — महोदय! रात्रिदिवसयोः विभाजनं कथं भवति?

**गुरुः** — पृथ्वी गोलाकारा विद्यते। एषा अहर्निशं केन्द्रे परिभ्रमति। यदा अस्याः यः भागः सूर्यस्य सम्मुखे भवति तत्र सूर्यस्य किरणाः पतन्ति तदा दिनं जायते। यस्मिन् भागे किरणाः न पतन्ति तत्र अन्धकारः भवति रात्रिश्च जायते। सूर्यः प्रातः पूर्वस्यां दिशि उदेति सायं च पश्चिमदिशि अस्तं गच्छति। एवं सूर्यस्य उदयानन्तरं दिनस्य अस्तानन्तरं च रात्रेः ज्ञानं भवति। दिवानिशानुसारमेव जनाः विविधाः क्रियाः सम्पादयन्ति।

**शिष्यः** — सप्ताहे कति दिनानि भवन्ति?

**गुरुः** — सप्ताहे सप्त दिनानि भवन्ति। तेषां नामानि तु—रविवासरः, सोमवासरः, मङ्गलवासरः, बुधवासरः, गुरुवासरः, शुक्रवासरः, शनिवासरः चेति।

**शिष्यः** — वर्षे कति मासाः भवन्ति?

**गुरुः** — वर्षे द्वादश मासाः भवन्ति। तेषां नामानि तु— चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रपदः, आश्विनः, कार्तिकः, मार्गशीर्षः, पौषः, माघः, फाल्गुनः चेति।

**शिष्यः** — तिथयः कति भवन्ति?

**गुरुः** — प्रतिपक्षं तिथयः पञ्चदश भवन्ति। यथा- प्रतिपदा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा, अमावस्या वा।

मासे द्वौ पक्षौ भवतः शुक्लपक्षः, कृष्णपक्षः चेति। शुक्लपक्षे पूर्णिमा कृष्णपक्षे च अमावस्या भवति। शुक्लपक्षे चन्द्रः क्रमशः वर्धते। पूर्णिमायां सः पूर्णतां प्राप्नोति। सः पञ्चदशभिः कलाभिः पूर्णः भवति। कृष्णपक्षे च क्रमशः क्षयं प्राप्नोति। प्रतिदिनं तस्य एका कला क्षीयते। अमावस्यायां सः पूर्णरूपेण लुप्तः भवति।

**शिष्यः** — वर्षे कति ऋतवः भवन्ति?

**गुरुः** — चैत्रवैशाखयोः - वसन्तः, ज्येष्ठाषाढयोः - ग्रीष्मः, श्रावणभाद्रपदयोः - वर्षा, आश्विनकार्तिकयोः - शरद्, मार्गशीर्षपौषयोः - हेमन्तः, माघफाल्गुनयोः - शिशिरः एवं षड् ऋतवः भवन्ति। शिष्य! एकादशतः विंशतिपर्यन्तं सङ्ख्यां गणय।

**शिष्यः** – आम्। एकादश, द्वादश, त्रयोदश, चतुर्दश, पञ्चदश, षोडश, सप्तदश, अष्टादश, नवदश, विंशतिः।

**गुरुः** – साधु वत्स! सम्यगुक्तम्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| अहर्निशम् | = | दिन-रात | पक्षः | = | पखवारा (महीने का आधा भाग) |
| क्षयम् | = | नाश, हानि को | कला | = | शोभा (चन्द्रमा की कला) |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

   (क) सप्ताहे कति दिनानि भवन्ति?

   (ख) कति तिथयः भवन्ति?

   (ग) सूर्यः कस्यां दिशि उदेति?

   (घ) वर्षे कति मासाः भवन्ति?

   (ङ) चैत्रवैशाखयोः कः ऋतुः भवति?

2. **एकवाक्येन उत्तरं लिखत–**

   (क) माघफाल्गुनयोः कः ऋतुः भवति?

   (ख) चन्द्रः कदा पूर्णतां प्राप्नोति?

   (ग) अमावस्या कस्मिन् पक्षे भवति?

   (घ) कौ द्वौ पक्षौ भवतः?

3. **समुचितं युग्मनिर्माणं कुरुत –**

| | (अ) | (ब) |
|---|---|---|
| (क) | श्रावणमासे | ग्रीष्मः |
| (ख) | मार्गशीर्षमासे | शरद् |
| (ग) | चैत्रमासे | शिशिरः |
| (घ) | आषाढमासे | वर्षा |
| (ङ) | फाल्गुनमासे | वसन्तः |
| (च) | कार्तिकमासे | हेमन्तः |

4. **अधोलिखितेषु समुचितं पदं चित्वा रिक्तस्थानानि पूरयत –**

(क) शुक्लपक्षे ............ तिथिः भवति। (अमावस्या/पूर्णिमा)

(ख) ज्येष्ठमासानन्तरम् .......... मासः भवति। (श्रावणः/आषाढः)

(ग) सप्ताहे .......... दिनानि भवन्ति। (नव/सप्त)

(घ) शुक्लपक्षे चन्द्रः क्रमशः ............। (क्षीयते/वर्धते)

(ङ) पक्षे तिथयः .......... भवन्ति। (षोडश/पञ्चदश)

5. **निम्नलिखितशब्दानां पर्यायशब्दान् लिखत–**

**यथा-** सूर्यः – रविः भानुः

(क) चन्द्रः – ............. .............

(ख) पृथ्वी – ............. .............

(ग) वासरः – ............. .............

(घ) निशा – ............. .............

6. **पाठे आगतान् अव्ययशब्दान् चित्वा पञ्चवाक्यानि लिखत–**

यथा - 'च' अव्ययम् - मासे शुक्लपक्षः कृष्णपक्षः च भवतः।

7. **रिक्तस्थानानि पूरयत (नामानि क्रमेण लिखत)–**

(क) वसन्तः .............. वर्षा ................. ................. शिशिरः।

(ख) शनिवासरः ................. .......... मङ्गलवासरः............ ......... ..........।

(ग) चैत्रः ........... ........... आषाढः ........... ........... आश्विनः ........... ........... पौषः ........... ...........

(घ) ........... द्वादश ........... ........... पञ्चदश ........... ........... ..........नवदश ...........।

(ङ) प्रतिपदा ........... ........... ........... पञ्चमी ........... ........... ........... नवमी ........... ........... ........... त्रयोदशी ........... अमावस्या।

**योग्यताविस्तारः –**

- "तिथि" शब्दस्य "कला" शब्दस्य च शब्दरूपाणि कण्ठस्थं कुरुत।

*चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।*

## तृतीयः पाठः

# बलाद् बुद्धिर्विशिष्यते

**शिक्षकः** — छात्राः! कः पशुः सर्वश्रेष्ठः अस्ति?

**रमेशः** — महोदय! सिंहः सर्वश्रेष्ठः अस्ति।

**शिक्षकः** — कथम्?

**अखिलेशः** — सिंहः पराक्रमशीलः भवति।

**शिक्षकः** — शोभनम्, परन्तु बलेनैव कोऽपि सर्वश्रेष्ठः न, अपितु बुध्यैव श्रेष्ठः भवति।

**हितेशः** — किं बलापेक्षया बुद्धिः महत्त्वपूर्णा भवति?

**शिक्षकः** — आम्, यः बुद्धिमान् स एव बलवान् भवति।

**राजेशः** — कथम् एवम्?

**शिक्षकः** — शृणोतु—

एकस्मिन् पर्वते दुर्मुखः नाम महौजस्वी सिंहः वसति स्म। सः च सदैव बहूनां पशूनां वधं करोति स्म। एकदा सर्वे पशवः सिंहस्य समीपम् अगच्छन् अवदन् च - मृगेन्द्र! त्वं सदैव पशूनां वधं कथं करोषि? प्रसीद, वयं स्वयं तव भोजनाय प्रतिदिनम् एकैकं पशुं प्रेषयिष्यामः।

ततः सिंहः अवदत् - यदि यूयम् एवम् इच्छथ तर्हि तथा कुर्वन्तु। ततः प्रभृति एकः पशुः प्रतिदिनं क्रमेण सिंहस्य समीपं गच्छति स्म।

एकदा एकस्य शशकस्य वारः समायातः। सूर्योदयसमये सिंहस्य समीपं गच्छन् सः अचिन्तयत् - 'मम मरणं तु निश्चितम् एव, अतः मन्दगत्यैव गच्छामि।' अनन्तरं स्वजीवनरक्षायै उपायं चिन्तयित्वा सः सिंहस्य समीपम् अगच्छत्।

तत्र सिंहः तु क्षुधया पीडितः आसीत्। अतिक्रुद्धः सः शशकम् अपृच्छत् - त्वं विलम्बेन कथम् आगतवान्? शशकः सविनयम् अवदत्- राजन्! न मम दोषः। मार्गे अपरः सिंहः आसीत्। सः माम् अपश्यत् अवदत् च ''अहम् अस्य वनस्य राजा, अहं त्वां भक्षयिष्यामि।'' अहं तम् अवदम् - अस्य वनस्य राजा तु दुर्मुखः नाम सिंहः अस्ति। सः अद्यैव मां भक्षयिष्यति। अहम् अधुना तस्यैव भोजनाय गच्छामि। अहं तु केनापि प्रकारेण तं वञ्चयित्वा भवतः समीपम् आगतः। एतत् श्रुत्वा दुर्मुखः अतिक्रुद्धः अभवत्।

क्रोधोद्धतः दुर्मुखः अवदत् - हे शठ! कुत्र अस्ति सः अपरः सिंहः? तं सत्वरं मां दर्शय। शशकः सिंहम् एकस्य गभीरस्य कूपस्य समीपम् अनयत् अकथयत् च - स्वामिन् पश्यतु! अस्मिन् कूपे एव सः सिंहः वसति।



दुर्मुखः तस्य कूपस्य जले स्वप्रतिबिम्बं पश्यति। सः स्वप्रतिबिम्बम् एव अपरं सिंहं मत्वा गर्जति। तस्य गर्जनस्य प्रतिध्वनिः भवति। अतः कूपे अपरः सिंहः अस्ति इति विचिन्त्य सः कूपे कूर्दति मृत्युं च प्राप्नोति।

यथोक्तम्—

बुद्धिर्यस्य बलं तस्य, निर्बुद्धेस्तु कुतो बलम्।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः।।

**सर्वेशः** - अवगतम्, तदेव बलाद् बुद्धिः विशिष्यते।

**शिक्षकः** - आम्, सत्यम्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| प्रसीद | = | प्रसन्न होओ | प्रेषयिष्यामः | = | भेजेंगे |
| अचिन्तयत् | = | सोचा | चिन्तयित्वा | = | सोचकर |
| शशकः | = | खरगोश | अपरः | = | दूसरा |
| अद्यैव | = | आज ही | अधुना | = | इस समय |
| श्रुत्वा | = | सुनकर | सत्वरम् | = | शीघ्र |
| क्षुधया | = | Hkw[k ls | क्रोधोद्धतः | = | Øks/k esa vkdj |

मत्वा = मानकर

वञ्चयित्वा = ठगकर

अपश्यत् = देखा

विचिन्त्य = सोचकर

निपातितः = गिराया गया

अनयत् = लाया

ततः प्रभृति = तब से लेकर (अब तक)

मदोन्मत्तः = en esa pwj

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) सिंहस्य नाम किम् आसीत्?

(ख) सिंहः केषां वधं करोति स्म?

(ग) सर्वे पशवः कस्य समीपम् अगच्छन्?

(घ) सिंहः कूपस्य जले किम् अपश्यत्?

(ङ) अपरं सिंहं मत्वा दुर्मुखः किम् अकरोत्?

**2. एकवाक्येन उत्तरं लिखत–**

(क) कः पराक्रमशीलः भवति?

(ख) एकदा कस्य वारः समायातः?

(ग) शशकः सिंहं कुत्र अनयत्?

(घ) सिंहः कया पीडितः आसीत्?

(ङ) सिंहस्य गर्जनस्य का भवति?

**3. शुद्धकथनानां समक्षम् ''आम्'', अशुद्धकथनानां समक्षं ''न'' इति लिखत–**

(क) दुर्मुखः पशूनां वधं न करोति स्म।

(ख) एकः पशुः प्रतिदिनं क्रमेण सिंहस्य समीपं गच्छति स्म।

(ग) सिंहः तु क्षुधया पीडितः आसीत्।

(घ) शशकः मार्गे वस्तुतः अपरं सिंहं न अपश्यत्।

(ङ) शशकः दुर्मुखम् एकस्य गभीरस्य कूपस्य समीपम् अनयत्।

**4. विलोमशब्दान् योजयत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | एकः | जननम् |
| (ख) | निश्चितम् | शीघ्रतया |

| | | |
|---|---|---|
| (ग) | मरणम् | दूरम् |
| (घ) | विलम्बेन | अनेकः |
| (ङ) | समीपम् | अनिश्चितम् |

5. **अधोलिखितशब्दानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत–**

| | शब्दः | सन्धिविच्छेदः | सन्धेः नाम |
|---|---|---|---|
| **यथा-** | महोदयः | महा + उदयः | गुणस्वरसन्धिः |
| (क) | सदैव | | |
| (ख) | मृगेन्द्रः | | |
| (ग) | बलेनैव | | |
| (घ) | सूर्योदयः | | |
| (ङ) | महौजस्वी | | |
| (च) | यथोक्तम् | | |
| (छ) | एकैकम् | | |

6. **अधोलिखितशब्दानां सन्धिं कृत्वा सन्धिनाम लिखत–**

| | सन्धिविच्छेदः | सन्धिशब्दः | सन्धेः नाम |
|---|---|---|---|
| **यथा-** | सर्व + ईशः | सर्वेशः | गुणस्वरसन्धिः |
| (क) | देव + एकत्वम् | | |
| (ख) | राजा + ईशः | | |
| (ग) | बुध्या + एव | | |
| (घ) | मद + उन्मत्तः | | |
| (ङ) | जल + ओघः | | |

7. **कोष्ठकात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत–**

(क) त्वं किमर्थं सर्वदा पशूनां वधं ...............। (करोति/करोषि)

(ख) सः सिंहस्य समीपम् ...............। (अगच्छत्/अगच्छन्)

(ग) अहम् अधुना तस्य भोजनाय ...............। (गच्छति/गच्छामि)

(घ) अस्मिन् कूपे सः सिंहः ...................। (वसति/वसामि)

**योग्यताविस्तारः –** • हितोपदेशात् पञ्चतन्त्रात् च अन्याः कथाः पठत।

*निर्बुद्धेः कुतो बलम्।*

चतुर्थः पाठः

# चाणक्यवचनानि

चाणक्यः चन्द्रगुप्तमौर्यस्य गुरुः आसीत्। सः महान् राजनीतिज्ञः, अर्थशास्त्रज्ञश्च आसीत्। ''चाणक्यनीतिः कौटिलीयमर्थशास्त्रञ्च'' एतौ द्वौ ग्रन्थौ प्रसिद्धौ स्तः। चाणक्यः नन्दवंशस्य उन्मूलनं कृत्वा चन्द्रगुप्तमौर्यं सिंहासने स्थापितवान्। तस्य वचनानि अत्र प्रस्तूयन्ते –

माता शत्रुः पिता वैरी, येन बालो न पाठितः।
न शोभते सभामध्ये, हंसमध्ये बको यथा॥ 1॥

अधमाः धनमिच्छन्ति, धनं मानं च मध्यमाः।
उत्तमाः मानमिच्छन्ति, मानो हि महतां धनम्॥ 2॥

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च॥ 3॥

सुखार्थी चेत्त्यजेत् विद्यां, विद्यार्थी चेत्त्यजेत्सुखम्।
सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतस्सुखम्॥ 4॥

तक्षकस्य विषं दन्ते मक्षिकायाः विषं मुखे।
वृश्चिकस्य विषं पुच्छे, सर्वाङ्गे दुर्जनस्य तु॥ 5॥

कामधेनुगुणा विद्या सर्वदा फलदायिनी।
प्रवासे मातृसदृशी विद्या गुप्तधनं स्मृतम्॥ 6॥

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा॥ 7॥

### शब्दार्थाः

| | | | |
|---|---|---|---|
| बकः | = बगुला | पुच्छे | = पूँछ में |
| महताम् | = श्रेष्ठ लोगों का | प्रवासे | = यात्रा में |
| अधमाः | = निम्न कोटि के (लोग) | वासितम् | = सुगन्धित |
| तक्षकः | = सर्प विशेष | कामधेनुगुणा | = इच्छा पूरी करने वाली गाय के समान गुण वाली |
| मक्षिका | = मक्खी | | |
| वृश्चिकः | = बिच्छू | मातृसदृशी | = माता के समान |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

(क) अपाठितः बालः कुत्र न शोभते?

(ख) महतां धनं किम्?

(ग) तक्षकस्य विषं कुत्र वर्तते?

(घ) प्रवासे विद्या कीदृशी भवति?

(ङ) वृश्चिकस्य विषं कुत्र वर्तते?

(च) मक्षिकायाः विषं कुत्र वर्तते?

2. **एकवाक्येन उत्तरं लिखत–**

(क) के मानम् इच्छन्ति?

(ख) सुखार्थी किं न प्राप्नोति?

(ग) विद्यार्थी किं न प्राप्नोति?

(घ) विद्या कीदृशं धनं भवति?

(ङ) घटः कथं पूर्यते?

3. **कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत–**

(क) ........... मानम् इच्छन्ति। (अधमाः/उत्तमाः)

(ख) विद्यार्थिनः कुतः ..............। (सुखम्/दुःखम्)

(ग) मक्षिकायाः ................. विषम्। (पुच्छे/मुखे)

(घ) सुपुत्रेण ............... यथा। (कुलं/वनं)

(ङ) हंसमध्ये ............. यथा। (बकः/बालः)

4. **अधोलिखितशब्दानां विलोमशब्दान् लिखत–**

(क) सुखार्थी –

(ख) दुर्जनः –

(ग) सत्यम् –

(घ) गुणः –

(ङ) धर्मः –

(च) सुपुत्रः –

5. **समानार्थकशब्दान् लिखत–**

(क) माता (ख) वनम् (ग) पुत्रः

(घ) धनम्

6. **पदानां विभक्तिं वचनं च लिखत–**

| | पदानि | विभक्तिः | वचनम् |
|---|---|---|---|
| **यथा–** | रामेण | तृतीया | एकवचनम् |
| (क) | माता | | |
| (ख) | पिता | | |
| (ग) | उत्तमाः | | |
| (घ) | विद्यानाम् | | |
| (ङ) | पुष्पितेन | | |

7. **क्रियापदानां धातुं वचनं पुरुषं च लिखत–**

| | क्रियापदानि | धातुः | पुरुषः | वचनम् |
|---|---|---|---|---|
| **यथा-** | शोभते | शोभ् | प्रथमपुरुषः | एकवचनम् |
| (क) | पूर्यन्ते | | | |
| (ख) | सेवध्वे | | | |
| (ग) | इच्छन्ति | | | |
| (घ) | लभावहे | | | |

8.. **श्लोकांशान् यथायोग्यं योजयत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | सुखार्थिनः कुतो विद्या | हंसमध्ये बको यथा। |
| (ख) | न शोभते सभामध्ये | दुर्जनस्य तु सर्वाङ्गे । |
| (ग) | वृश्चिकस्य विषं पुच्छे | सुपुत्रेण कुलं यथा। |
| (घ) | वासितं तद्वनं सर्वम् | विद्यार्थिनः कुतस्सुखम्। |

9. **उदाहरणानुगुणम् अन्वयपूर्तिं कुरुत–**

अधमाः धनमिच्छन्ति, धनं मानं च मध्यमाः।

उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्॥

**अन्वयः** अधमाः धनम् इच्छन्ति, मध्यमाः धनं मानं च इच्छन्ति, उत्तमाः मानम् इच्छन्ति, महतां धनं मानः हि।

1. सुखार्थी चेत् ............. त्यजेत्, विद्यार्थी ........... सुखं ................, सुखार्थिनः विद्या ................, विद्यार्थिनः ............. कुतः।

2. तक्षकस्य ............... विषं, ............... मुखे विषं, .............. पुच्छे विषं दुर्जनस्य ................. विषम्।

**योग्यताविस्तारः –**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लभते | लभेते | लभन्ते |
| मध्यमपुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुषः | लभे | लभावहे | लभामहे |

एवं रम्, वन्द्, भाष्, धातूनां रूपाणि लिखत।

*राज्यस्य मूलं धर्मः।*

पञ्चमः पाठः

# रक्षाबन्धनम्

(कक्षायां छात्राः वार्तालापं कुर्वन्ति)



**घनश्यामः** – वर्षे! अद्य त्वं अति-आह्लादिता असि। किं कारणम्?

**वर्षा** – आम्। घनश्याम! ह्यः मम द्वावपि अग्रजौ इन्दौरनगरात् गृहं प्रत्यागच्छताम्। नूनं परश्वः रक्षाबन्धनस्य पावनपर्व भविष्यति।

**मेघावती** – सत्वरं तूष्णीं भवन्तु। आचार्यः आगच्छति।

(आचार्यः प्रविशति। छात्राः उत्तिष्ठन्ति अभिवादनं च कुर्वन्ति)

**आचार्यः** – उपविशत! अस्माकं देशे के के प्रमुखाः उत्सवाः भवन्ति? मेघावति! त्वं वद।

**मेघावती** – विजयादशमी, दीपावलिः, नवरोज्, ईद, होलिकोत्सवः, बैसाखी, ओणम्, मकर-सङ्क्रान्तिः च।

**आचार्यः** – उचितम्। सम्प्रति श्रावणमासः। श्रावणमासस्य पौर्णिमायां रक्षाबन्धनपर्व भविष्यति। अद्य वयं 'रक्षाबन्धनम्' इति निबन्धं पठिष्यामः।

जनाः उत्सवप्रियाः भवन्ति। सामाजिकतायाः विकासे उत्सवाः सहायकाः। सुखस्य वृद्ध्यर्थम् अपि ते सहायकाः। उत्सवाः समाजस्वभावं संस्कृतिञ्च प्रकटीकुर्वन्ति। भारते अनेके उत्सवाः भवन्ति। तेषु रक्षाबन्धनम् एकः प्रमुखः उत्सवः। अयं कालः जनानां मनांसि आह्लादयति। पुनःपुनः वर्षन्त्यः जलधाराः जीवसृष्टिं पुलकितां कुर्वन्ति। मयूराः स्वबर्हं प्रसार्य नृत्यन्ति। बालिकाः, नवयुवतयः च दोलनक्रीडया प्रसन्नाः भवन्ति। लोकगायकाः वर्षागीतानि गायन्ति नृत्यन्त्यपि।

रक्षाबन्धनं सुरक्षायाः बन्धनं भवति। यस्मै रक्षासूत्रं दीयते सः सुरक्षावचनं ददाति तद्वचनं प्राणपणेन पालयति च। वर्तमाने काले भगिनी भ्रातुः मस्तके तिलकं कृत्वा रक्षासूत्रं बध्नाति। तस्मै मिष्टान्नं भोजयति तस्य कृते मङ्गलकामनां च करोति।

भ्राता अपि तस्याः रक्षायै वचनबद्धः भवति। कतिपयाः जनाः संस्थाः च सैनिकेभ्यः रक्षासूत्राणि प्रेषयन्ति। सैनिकाः अपि अहर्निशं प्राणार्पणेन देशरक्षां कुर्वन्ति। स्त्रियः बन्धितानां कृते रक्षासूत्रबन्धनार्थं कारागारं गच्छन्ति। सागरतटप्रदेशे जनाः सागरपूजाम् अपि कुर्वन्ति।

पुराणे एका कथा अस्ति। देवासुरसङ्ग्रामे विजयप्राप्त्यर्थम् इन्द्रपत्नी शची इन्द्रस्य रक्षासूत्रबन्धनम् अकरोत्। तदारभ्य रक्षाबन्धनोत्सवस्य आरम्भः इति। पुरा याज्ञिकाः पुरोहिताः यजमानस्य राज्ञः च कल्याणार्थं तेभ्यः रक्षासूत्रार्पणं कुर्वन्ति स्म।

श्रूयते खलु इतिहासस्य मध्ययुगे साम्राज्ञी कर्मवती हुमायुँ नामाख्यं मुगलशासकं बहुस्नेहेन रक्षासूत्रं प्रेषितवती। सः अपि श्रद्धया तत् स्वीकृतवान्। सः स्नेहेन भ्रातृभगिनीसम्बन्धस्य रक्षाम् अपि अकरोत्। एवं जातिधर्मनिरपेक्षः अयम् उत्सवः प्रवर्तते।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| अति-आह्लादिता | = | बहुत प्रसन्न | आह्लादयति | = | प्रसन्न करता है |
| अग्रजः | = | बड़ा भाई | दोलनक्रीडा | = | झूला झूलने का खेल |
| तूष्णीं | = | eksu | प्राणपणेन | = | izk.k nsdj |
| प्रत्यागच्छताम् | = | (प्रति + आ + अगच्छताम्) लौट आये | स्वबर्हम् | = | अपने पंख को |
| | | | प्रसार्य | = | फैलाकार |
| पावनम् | = | (पौ + अनम्) पवित्र | भोजयति | = | खिलाती है/खिलाता है |
| रक्षासूत्रम् | = | राखी | गायकः | = | (गै + अकः) गायक |
| प्रवर्तते | = | izo`Ùk gksrk gS | बध्नाति | = | cka/krh gS |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

   (क) द्वावपि अग्रजौ कुतः गृहं प्रत्यागच्छताम्?

   (ख) के उत्सवप्रियाः भवन्ति?

   (ग) कस्य वृद्ध्यर्थम् उत्सवाः सहायकाः?

   (घ) श्रावणमासस्य कालः केषां मनांसि आह्लादयति?

2. **एकवाक्येन उत्तरं लिखत–**

   (क) के वर्षागीतानि गायन्ति नृत्यन्ति च?

   (ख) का रक्षासूत्रं बध्नाति?

   (ग) कर्मवती कं रक्षासूत्रं प्रेषितवती?

   (घ) के संस्कृतिं प्रकटीकुर्वन्ति?

3. **रेखांङ्कितशब्दान् आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) मयूराः स्वबर्हं प्रसार्य नृत्यन्ति।

(ख) बालिकाः नवयुवतयः दोलनक्रीडया प्रसन्नाः भवन्ति।

(ग) सैनिकाः अहर्निशं देशरक्षां कुर्वन्ति।

(घ) श्रावणमासस्य पौर्णिमायां रक्षाबन्धनपर्व भवति।

4. **अर्थानुसारं युग्मनिर्माणं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | ते संस्कृतिं प्रकटीकुर्वन्ति | सागरतटे |
| (ख) | सागरपूजामपि कुर्वन्ति जनाः | रक्षाबन्धनोत्सवः |
| (ग) | जातिधर्मनिरपेक्षः अयम् उत्सवः | भगिनी |
| (घ) | तस्मै मिष्टान्नं भोजयति | उत्सवाः |

5. **निम्नलिखितपदानां मूलशब्दं विभक्तिं वचनं च लिखत–**

| | पदानि | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| यथा– | अग्रजौ | अग्रज | प्रथमा/द्वितीया | द्विवचनम् |
| (क) | पौर्णिमायाम् | | | |
| (ख) | स्नेहेन | | | |
| (ग) | सुखस्य | | | |
| (घ) | सहायकाः | | | |

6. **कोष्ठात् उचितरूपं चित्वा रिक्तस्थानानि पूरयत–**

(क) अद्य त्वं बह्वाह्लादिता ..................। (अस्ति/असि)

(ख) सर्वे तूष्णीं ................। (भवतु/भवन्तु)

(ग) परश्वः रक्षाबन्धनपर्व ...............। (भविष्यति/भवति)

(घ) वर्षागीतानि गायन्ति ................। (गायकाः/गायकः)

(ङ) स्वबर्हं प्रसार्य नृत्यति .................। (मयूराः/मयूरः)

7. **निम्नाङ्कितशब्दान् आधृत्य वाक्यनिर्माणं कुरुत–**

(क) श्रावणमासे

(ख) मयूराः

(ग) सैनिकाः

(घ) लोकगायकाः

8. **पाठात् चित्वा सन्धियुक्तशब्दान् लिखत–**

| | | | |
|---|---|---|---|
| (क) | गै | + | अकः |
| (ख) | नाम | + | आख्यम् |
| (ग) | द्वौ | + | अपि |
| (घ) | नृत्यन्ति | + | अपि |

9. **नायकः, इत्यादि, उभावपि, राजाज्ञा, एतेषां शब्दानां सन्धिविच्छेदं कुरुत।**

**योग्यताविस्तारः –**

- पठित्वा ज्ञायताम्

| | | |
|---|---|---|
| चैत्रमासे | — | वर्षप्रतिपदा (वर्षारम्भः) |
| श्रावणमासे | — | रक्षाबन्धनोत्सवः |
| आश्विनमासे | — | विजयादशमी |
| कार्तिकमासे | — | दीपावलिः |
| पौषमासे | — | मकरसङ्क्रान्तिः |
| फाल्गुनमासे | — | होलिकोत्सवः |
| अगस्तमासे | — | नवरोज् |

- 'दीपावलि' विषये पञ्चवाक्यानि लिखत।
- वर्षर्तुम् आधृत्य संस्कृते पञ्चवाक्यानि लिखत।

*सर्वान् रक्षन्तु सर्वदा।*

षष्ठः पाठः

# प्रयत्नो विधेयः



**रविः** — श्याम! एषा अतिगभीरा नदी। नद्याम् अपारं जलम् अस्ति मम च भ्राता मोहनः तरति।

**श्यामः** — नद्यां मोहनः कथं तरति? तरणं तु अतिकठिनम्। सः अपारे जले कथं न मज्जति?

**रविः** — त्वम् उचितं वदसि यत् तरणम् अतिकठिनं, किन्तु मोहनः तरणस्य प्रयत्नं करोति अतः सः न मज्जति। प्रयत्ने कृते कठिनकार्याणि अपि सरलानि भवन्ति। यथा–

- प्रयत्नेन एव महाभारतयुद्धे पाण्डवाः जयं प्राप्तवन्तः।
- अस्माकं भारतदेशः प्रयत्नेन एव परतन्त्रतापाशात् मुक्तः।
- प्रयत्नेन एव जनाः उत्तुङ्गपर्वतेषु अपि आरोहणं कुर्वन्ति।
- प्रयत्नेन एव छात्रः परीक्षायाम् अधिकान् अङ्कान् प्राप्नोति।
- अतः अस्माभिः पुनःपुनः प्रयत्नः विधेयः। प्रयत्नेन जनाः किं-किं कुर्वन्ति अद्य वयं पाठे पठामः